"नह्यदत्तां मही पित्रा भरतः शास्तुमिच्छति"
इति रामायणं ।)

अदत्ता, स्त्री, (न दत्ता नोत्सृष्टा नञ्समासः, नञत्र निषेधार्थः ।) अविवाहिता । इति स्मृतिः ।

अदनं, क्ली, (अद् भोजने भावे ल्युट् ।) भक्षणं । भोजनं । इति हेमचन्द्रः ॥
("इन्धनार्थमशुष्काणां द्रुमाणामवपातनं ।
आत्मार्थञ्च क्रियारम्भो निन्दितान्नादनं तथा" ॥
इति मनुः ।)

अदभ्रः, त्रि, (दन्भ + रक् । दभ्रमल्पं नदभ्रं नञ्समासः ।) प्रचुरः । बहुः । इत्यमरः ॥ (अदभ्रदर्भामधिशय्य स स्थलीं जहाति निद्रामशिवैः शिवारुतैः ॥ इति किरातार्ज्जुनीयं ॥)

अदर्शनं, क्ली, (दृश् दर्शने, भावे ल्युट्, नञ्समासः ।) दर्शनाभावः । (अदर्शनञ्च ते वीर भूयो मां तापयिष्यति ॥ इति रामायणं ।) असाक्षात् । दृष्ट्यगोचरं । तत्पर्य्यायः । विनाशः २ । इत्यमरः । (व्याकरणमते लोपः यथा ऋग्वेदप्रातिशाख्ये,—
"विकृत्तिषु प्रत्ययादेरदर्शनम्" । इति ।)

अदलः, पुं, (न दल्यते भिद्यते यत्, न दल् + घञर्थे कन् ।) हिज्जलवृक्षः । इति शब्दचन्द्रिका ॥ दलरहिते त्रि ॥

अदला, स्त्री, (नास्ति दलं पत्रं यस्याः सा ।) घृतकुमारी । इति शब्दचन्द्रिका ॥

अदाता, त्रि, (न दाता नञ्समासः । दा + तृच् ।) कृपणः । दानशक्तिरहितः । यथा,—
"अदाता पुरुषस्त्यागी सधनं त्यज्य गच्छति" ।
इति प्राचीनाः ॥
("कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ।
मृते भर्त्तरि पुत्रस्तु वाच्यो मातुररक्षिता" ॥
इति मनुः ॥)

अदान्तः, त्रि, (न दान्तः नञ्समासः ।) तपःक्लेशासहिष्णुः । अकृतवाह्येन्द्रियनिग्रहः । इति पुराणं ॥

अदितिः, स्त्री, (दितिभिन्ना अदितिः । नञो दाञो डितिरिति शाकटायनोक्तेर्डितिप्रत्ययान्तो वा । अदनाददितिः वा ।) दक्षप्रजापतिकन्या । सा कश्यपपत्नी । देवमाता च । इति त्रिकाण्डशेषः ॥ भूमिः । अखण्डः । इति शब्दरत्नावली ॥

अदितिनन्दनः, पुं, (अदितेर्नन्दनः पुत्रः, षष्ठीतत्पुरुषः ।) देवता । इत्यमरः ॥

अदृक्, [श्] त्रि, (नास्ति दृक् चक्षुर्यस्य सः ।) दृष्टिरहितः । अन्धः । इत्यमरः ॥

अदृश्यं, त्रि, (दृश् + कर्म्मणि क्यप् न दृश्यं, नञ्समासः ।) अदर्शनीयं । अद्रष्टव्यं । "यथा,—
कन्याङ्गैरतिकोमला त्रिभुवनव्याप्याप्यदृश्या जनैः" ।
इत्युद्भटः ॥

अदृष्टं, क्ली, (न दृष्टं नञ्समासः ।) अग्निजलादिद्वारा जातं भयं । इत्यमरः ॥ जन्मान्तरीयसंस्कारः । भाग्यं । यथा । "अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिं ॥ इति श्रीहर्षः ॥ तत्तु आत्मनोऽतीन्द्रियगुणः । इदं वासनाजन्यं । तत्त्वज्ञाननाश्यं । भोगनाश्यञ्च । धर्म्माधर्म्मभेदेन तत् द्विविधं । धर्म्मस्तु स्वर्गादिकारणं । गङ्गास्नानयागादिजन्यः । कर्म्मनाशाजलादिस्पर्शनाश्यश्च । अधर्म्मस्तु नरकादिकारणं । प्रायश्चित्तादिनाश्यश्च । इति भाषापरिच्छेदः ॥

अदृष्टः, त्रि, (न दृष्टः ।) अज्ञातदर्शनः । अवीक्षितः ।
"अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता" ।
इति रसतरङ्गिण्यां भानुदत्तः ॥

अदृष्टवान्, [त्] त्रि, (अदृष्टं भाग्यं विद्यतेऽस्य, अदृष्टं मतुप् ।) भाग्यवान् । कपालिया इति भाषा । (स्त्रियां ङीप् अदृष्टवती) ।

अदृष्टिः, स्त्री, (न दृष्टिः नञ्समासः ।) प्रतिकूला दृष्टिः । कुत्सिता दृष्टिः । सरोषवक्रदृष्टिः । कुटिलचक्षुः । असौम्याक्षि । वक्रदृष्टियुक्तचक्षुः । इत्यमरः ॥

अदृष्टिका, स्त्री, (विरुद्धा दृष्टिः नञ्समासः । नञत्र विरोधार्थे, स्वार्थे कन् स्त्रियां टाप् ।) सरोषवक्रदृष्टिः । इति शब्दरत्नावली ॥

अदेवमातृकः, पुं, (देवो वृष्टिरम्बु माता मातृतुल्यो यत्र सः, समासान्तः कः, ततो नञ्समासः ।) देवमातृकभिन्नदेशः । नदीमातृकदेशः । यथा । (वितन्वति क्षेममदेवमातृकाः ॥ इति भारविः ॥)

अद्मः, पुं, (अद्यते भुज्यते यत्, अद् कर्म्मणि मन् ।) घृतं । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

अट्ट ङ अतिक्रमे बधे । इति कविकल्पद्रुमः ॥ दन्त्यवर्गतृतीयोपधः । (अट्टितुं अतिक्रमितुमिच्छति—अट्ट् + सन् + लट् ते ।) ङ अट्टिटिषते । इति दुर्गादासः ॥

अद्ड, अभियोगे । इति कविकल्पद्रुमः ॥ दन्त्यवर्गतृतीयोपधः । (अड्डितुं अभियोक्तुमिच्छति अद्ड् + सन् + लट् तिप् ।) अड्डिडिषति । क्विपि संयोगान्तलोपे अद् । अभियोगः समाधानं । अडुति पक्षं विद्वान् । अभि समन्तात् योगोऽभियोगः इति गोविन्दभट्टः ॥ इति दुर्गादासः ॥

अद्धा, व्य, (अतं सततं गमनं ज्ञानं वा दधाति अत् + धा + क्विप् ।) यथार्थं । तत्पर्य्यायः । तत्त्वं २ अञ्जसा ३ । इत्यमरः ॥ (अद्धा श्रियं पालितसङ्गराय प्रत्यर्पयिष्यत्यनघां स साधुः ॥ इति रघुः ।)

अद्भुतं, क्ली, अपूर्व्वं । तत्पर्य्यायः । विस्मयः २ आश्चर्य्यं ३ चित्रं ४ । तद्विशिष्टे वाच्यलिङ्गं । इत्यमरः ॥

अद्भुतं, त्रि, (अततीति अत् + क्विप् आकस्मिकार्थमयं तथा भाति-भा + डुतच् ।) आश्चर्य्यं । तत्पर्य्यायः । दृष्टं २ । इति जटाधरः ॥ * ॥ अथाद्भुतं । अद्भुतसागरे आथर्व्वणाद्भुतवचनं । प्रकृतिविरुद्धमद्भुतमापदः प्राक् प्रबोधाय देवाः सृजन्तीति । तेन आपज्ज्ञानाय भूम्यादीनां पूर्व्वं स्वभावप्रच्यवोदेवकार्टकोऽद्भुत इति ॥ एवञ्च बुधोदयपर्व्वग्रहणादीनां गणितागतत्वेन प्रकृतानामपि यदुत्पातत्वं तद्गाक्तं ।
तत्कारणञ्च गर्गसंहितावार्हस्पत्ययोः ॥
"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः ।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते ॥
ततोऽपचारान्नियतमपवर्ज्जन्ति देवताः ।
ताः सृजन्त्यद्भुतां स्तांस्तु दिव्यनाभसभूमिजान् ॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च" ॥
तांश्च परं न दर्शयेदित्याह विष्णुः ॥ नोत्पातं दर्शयेदिति ॥ * ॥ तत्र वेलानक्षत्रमण्डलनिरूपणं । यथा दीपिकायां ॥
"प्राक्ह्निचतुर्भागेषु मुनिशोद्भवेषु सर्व्वेषु ।
अनिलाग्निशक्रवरुणा मण्डलपतयः शुभाशुभेषु ॥
बेलामण्डलं ॥ * ॥
"अर्य्यमादिचतुष्कचन्द्रतुरगादित्येषु वायुर्भवेत् ।
देवेज्याजविशाखयाम्ययुगले चित्राद्वये चानलः ॥
विश्वादित्रयधातमैत्रयुगलेष्विन्द्रो भवेन्मण्डलः ।
सर्पोपान्त्यमृगान्त्यमूलयुगलेशानेष्वपामीश्वरः ॥
पवनदहनौ नेष्टौ योगस्तयोरतिदुष्करः ।
सुरपवरुणौ शस्तौ योगस्तयोरतिशोभनः ॥
सवरुणमरुन्मिश्रः शक्रस्तथाग्निसमायुतः ।
फलविरहितः सेन्द्रो वायुस्तथाग्नियुतोऽम्बुपः ॥
यन्मण्डलेऽद्भुतं जातं शान्तिस्तद्दैवताश्रया ।
तथा शान्तिद्वयं कार्य्यं मण्डलद्वयजाद्भुते" ॥ * ॥
विष्णुधर्म्मोत्तरे ।
"ग्रहर्क्षवैकृतं दिव्यं आन्तरीक्षं निबोध मे ।
उल्कापातो दिशां दाहः परिवेशस्तथैव च ॥
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता तथा ।
एवमादीनि लोकेऽस्मिन् नाभसानि विनिर्द्दिशेत् ॥
चरस्थिरभवं भौमं भूकम्पमपि भूमिजं ।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितं ॥
भौमञ्चाल्पफलं ज्ञेयं चिरेण परिपच्यते ।
नाभसं मध्यफलदं मध्यकालफलप्रदं ॥
दिव्यं तीव्रफलं ज्ञेयं शीघ्रकारि तथैव च ॥ * ॥
शीतोष्णता विपर्य्यासः ऋतूनां रिपुजं भयं ॥
पुष्पे फले च विकृते राज्ञो मृत्युं तथादिशेत् ।
अकालप्रभवा नार्य्यः कालातीताः प्रजास्तथा ॥
विकृताः प्रसवाश्चैव युग्मप्रसवनं तथा ।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा त्रयः ॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देशस्य कुलस्य च विनिर्द्दिशेत् ॥*॥
प्रदोषे कुक्कुटारावो हेमन्ते चापि कोकिलाः ।
अर्कोदयेऽर्काभिमुखश्वारावो भयं दिशेत् ॥
उलूको वसते यत्र निपतेद्वा तथा गृहे ।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥
गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च ।
चिल्लश्च चर्म्मचिल्लश्च भासः पाण्डर एव च ॥
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते ।
षण्मासान्मासतस्तथा वर्षान्मृत्युः स्याद्गृहमेधिनः ॥
पतगाः पुत्रस्य वा मृत्युर्द्रव्यस्यापि विनश्यति ।
ब्राह्मणाय गृहं दत्त्वा दत्त्वा तन्मूल्यमेव वा ॥
गृहीयाद्यदि रोचेत शान्तिञ्चेमां प्रयोजयेत् ।
मांसास्थीनि समादाय श्मशानाद्गृध्रवायसाः ॥
श्वा शृगालोऽथ वा मध्ये पुरस्य प्रविशन्ति चेत् ।
विकिरन्ति गृहादौ च श्मशानं सा मही भवेत् ॥